२९

देवतायांश्चावशिष्टं सलिलं शंखमध्यजं ॥ अंगेलग्नं
मनुष्याणां ब्रह्महत्यापापोहति ॥ तथा च मत्स्यसूक्ते ॥
अनिवेद्य न भुंजीत मत्स्यमांसादिकं तु यत् ॥ अन्नं विष्ठा
समं मूत्रं यद्विष्णोरनिवेदितं ॥ तथा च भैरवतंत्रे ॥ हृ
द्येन च वाहि देवीं समर्च्य विधिवत्ततः ॥ निर्माल्यं च शु
चौ देशे नैवेद्यं भक्षयेत्सुधीरिति ॥ अन्यतन्त्र देवतोप
लक्षणं ॥ इति पूजापद्धतिः ॥

॥ ॐ नमः शिवाय ॥ [illegible] ॥ श्रीमहेश्वर उवाच ॥
यमुक्तस्त्वयः स्वहस्तस्य [illegible] नाशिवे [illegible] नवर्णोद्विभुजं वराभय
करं श्वेतमाल्यानुलेपनं [illegible] पद्मासनस्थितं वामशा
गयात्वपूकाशहृपद्मासहितं विभाव्य॥ मानसोपचारैराराध्य
नमस्कुर्यात्॥ अखण्डमण्डलाकारं व्याप्तं येन चराचरं॥ तत्पदं
दर्शितं येन तस्मै श्रीगुरवे नमः॥१॥ अज्ञानतिमिरान्धस्य ज्ञा
२ नाञ्जनशलाकया॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः
॥२॥ ततो मूलादि ब्रह्मरन्ध्रान्तमूर्ध्वविद्योतं विभावयेत्॥ उद्यो
तदिनकरद्योतमयावृष्णी सहठासनः॥ श्रीशक्त्या सुषुम्नां तत्पदं
समाहितमना [illegible] शिवं॥ तत्प्रभापटलव्याप्तं शरीरमपि चिन्त
येत्॥ ततस्नानं स्वकं कृत्वा नद्यादौ स्नानार्थं गच्छेत्॥ ततः

१ एवंतोवैदिकेस्नानेस्वशाखोक्तं कृत्वा तांत्रिकस्नानमाचरेत्॥ यथा
गंगेत्यादि अमुकदेवताप्रीतये स्नानमहं करिष्ये॥ इति संकल्प्य॥
ततः षडंगन्यासं प्राणायामौ कृत्वा॥ गंगे च यमुने चैव गोदावरि
सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मिन् संनिधिं कुरु॥ इत्यंकुश
मुद्रया सूर्यमंडलात् तीर्थं जलेष्वावाह्य॥ वमिति धेनुमुद्रामृ
तीकृत्य ॐ इत्यवगुंठ्य फडिति संरक्ष्य मूलेनैकादशधाभिमंत्र्य म
र्धाभिमु[illegible]दशधा जलं निक्षिप्य॥ तज्जले निमज्य देवतां
ध्यायन् मूलमंत्रं यथाशक्त्या जपन् उन्मज्य॥ उदकेन [illegible]
केन कलशमुद्रया त्रिवारं मान्मानमभिषिंच्य॥ वैदिकसंध्या
तर्पणसूर्योपस्थानं कृत्वा तांत्रिकसंध्यां कुर्यात्॥ यथा जले गंगेव
यमुनेव [illegible]॥ [illegible]